Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. ३७४ - घ

Title रघुवंशः

Author कालिदासः

Extent ६ Age

Subject काव्यम् अपूर्ण

86

© Dharmartha Trust J&K. Digitized by eGangotri

५१, ११

नं. ३८०४-घ

रघुवंशः

(काव्यम्)

नं० ३७४ -घ

पत्राणि०-६ (अपूर्ण)

३ पत्राणि

© Dharmartha Trust J&K. Digitized by eGangotri

नं ३६४८
रघुवंश
(अपूर्ण)
५ पत्राणि

© Dharmartha Trust J&K. Digitized by eGangotri

१ ॥ श्रीगणेशायनमः ॥ श्रीराधादामोदराभ्यां नमः ॥ वागर्थाविव संपृक्तौ वागर्थ
प्रतिपत्तये ॥ जगतः पितरौ वंदे पार्वतीपरमेस्वरौ ॥१॥ क्व सूर्यप्रभवो वंशः क्व चा
ल्पविषया मतिः ॥ तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरं ॥२॥ मंदः कवियशः
प्रार्थी गमिष्याम्युपहास्यतां ॥ प्रांशुलभ्ये फले मोहादुद्बाहुरिव वामनः ॥
॥३॥ अथवा कृतवाग्द्वारे वंशेस्मिन्पूर्वसूरिभिः ॥ मणौ वज्रसमुत्कीर्णे सू
त्रस्यास्ति मे गतिः ॥४॥ सोहमाजन्मशुद्धानामाफलोदयकर्मणां ॥ आसमु
द्रक्षितीशानां मनाकरथवर्त्मनां ॥५॥ यथाविधिहुताग्नीनां यथाकामा
र्चितार्थिनां ॥ यथापराधदंडानां यथाकालप्रबोधिनां ॥६॥ त्यागाय संभृता
र्थानां सत्याय मितभाषिणां ॥ यशसे विजीगीषूणां प्रजायै गृहमेधिनां ॥७॥
शैसवेभ्यस्तविद्यानां यौवने विषयैषिणां ॥ वार्द्धिके मुनिवृत्तीनां योगेनांते तनु
त्यजां ॥८॥ रघुणामन्वयं वक्ष्ये तनुवाग्विभवोपि सन् ॥ तद्गुणैः कर्णमागत्य

© Dharmartha Trust J&K. Digitized by eGangotri

चापलाय प्रणोदित्त: ॥८॥ तं समत: श्रोतुमर्हेति सदसत् व्यक्तिहेतव: । हेम्न: संलक्ष्यते ह्यग्नौ विशुद्धि: श्यामिकापि वा ॥१०॥ वैवस्वतो मनुर्नाम माननीयो मनीषिणां ॥
आसीन्महीक्षितामाद्य: प्रणवश्छन्दसामिव ॥११॥ तदन्वये शुद्धिमति प्रसूत: ॥
शुद्धिमत्तर: । दिलीप इति राजेन्दुरिन्दु: क्षीरनिधाविव ॥१२॥ व्यूढोरस्को वृषस्कन्ध: ॥ शालप्रांशुर्महाभुज: ॥ आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रित: ॥१३॥
सर्वातिरिक्तसारेण सर्वतेजोभिभाविना ॥ स्थित: सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना ॥१४॥ आकारसदृशप्रज्ञ: प्रज्ञया सदृशागम: ॥ आगमै: सदृशारम्भ आरम्भसदृशोदय: ॥१५॥ भीमकान्तैर्नृपगुणै: स बभूवोपजीविनां ॥
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णव: ॥१६॥ रेखामात्रमपि क्षुण्णादा मनोर्वर्त्मन: परं न व्यतीयु: प्रजास्तस्य नियन्तुर्नेमिवृत्तय: ॥१७॥ प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ॥ सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रवि: ॥१८॥ सेना

© Dharmartha Trust J&K. Digitized by eGangotri

परिछदस्तस्य द्वयमेवार्थसाधनं शास्त्रेष्वाकुंठिता बुद्धि मौर्वी धनुसि चातता॥१९॥
सस्य संभृतमंत्रस्य गुढाकारेंगितस्य च॥ फलानुमेयाप्रारंभाः संस्काराप्राकृतनाइ
व॥२०॥ जुगोपात्मानमंत्रस्थो भेजे धर्ममनातुरः॥ अगृध्नुरादद्दे सोर्थाःनुस
क्तः सुखमन्वभुत॥२१॥ ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः॥ गुणागु
णानुबंधित्वात्तस्य सप्रसवा इव॥२२॥ अनाकृष्टस्य विषयो विद्यानां पारदृश्व
नः॥ तस्य धर्मरते रासीद्वृद्धत्वं जरसा विना॥२३॥ प्रजानां विनया धाना
द्रक्षणाद्भरणादपि॥ स पिता पितरस्तासां केवलं जन्महेतवः॥२४॥ स्थित्यै
दंडयतो दंड्यान्परिणेतुः प्रसूतये॥ अप्यर्थकामौ तस्यास्तां धर्म एव मनीषि
णः॥२५॥ दुदोह गां स यज्ञाय सस्याय सथवा दिवं॥ संपद्विनिमयेनोभौ दधतु
र्भुवनद्वयं॥२६॥ न किलानुययुःस्तस्य राजानो रक्षितेर्यशः॥ व्यावृत्ता य
त्परस्वेभ्यः श्रुतौ तस्करता स्थिता॥२७॥ द्वेष्यापि संमतः शिष्टस्तस्यार्तस्य यथो ॥२॥

© Dharmartha Trust J&K. Digitized by eGangotri

षधं ॥ त्याज्यो दुष्टः प्रियोप्यासी दृष्टोगुष्ठ इवाहिनः ॥ २८ ॥ तं वेधा विदधे नूनं म
हाभूतसमाधिना ॥ तथाहि सर्वे तस्यासन्परार्थैकफला गुणाः ॥ २९ ॥ स वेला
वप्रवलयां परिखीकृतसागरां ॥ अनन्यशासनामुर्वीं शशासैकपुरीमिव ॥ ३० ॥
तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा ॥ पत्नी सुदक्षिणेत्यासीदध्वरस्येव द
क्षिणा ॥ ३१ ॥ कलत्रवंतमात्मानमवरोधे महत्यपि ॥ तया मेने मनस्विन्या ल
क्ष्म्या च वसुधाधिपः ॥ ३२ ॥ तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः ॥ विलं
बितफलैः कालं स निनाय मनोरथैः ॥ ३३ ॥ संतानार्थाय विधये स्वभुजादवता
रिता ॥ तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ॥ ३४ ॥ गंगानागौ रघौ नवपूर्वे
पापाचनक्षमां ॥ दक्षतां संततिं तेन न्यस्ता मंत्रिषु कुशल्या ॥ ३५ ॥ अथाभ्यर्च्य वि
धातारं प्रयतौ पुत्रकाम्यया ॥ तौ दंपती वशिष्ठस्य गुरोर्जग्मतुराश्रमं ॥ ३६ ॥ स्नि
ग्धगंभीरनिर्घोषमेकं स्यंदनमास्थितौ ॥ प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ॥ ३७ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

मास्मद्दाश्रमपीडेति परिमेयपुरस्सरौ ॥ अनुभावविशेषात्तु सेनापरिवृताविव ॥
३८ ॥ सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः ॥ पुष्परेणूत्किरैर्वातैराधूत
वनराजिभिः ॥ ३९ ॥ मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः ॥ षड्जसंवा
दिनीः केका द्विधा भिन्नाः शिखण्डिभिः ॥ ३९ ॥ परस्पराक्षिसादृश्यमदूरोज्झित
वर्त्मसु ॥ मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु ॥ ४० ॥ श्रेणीबन्धाद्वितन्वद्भि
रस्तम्भां तोरणस्रजं ॥ सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥ ४१ ॥ पवनस्या
नुकूलत्वात्प्रार्थनासिद्धिशंसिनः ॥ रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ॥ ४२ ॥
सरसीष्वरविन्दानां वीचिविक्षोभशीतलं ॥ आमोदमुपजिघ्रन्तौ स्वनिश्वासानु
कारिणं ॥ ४३ ॥ ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनां ॥ अमोघाः प्रतिगृह्णन्ता
वर्घ्यानुपदमाशिषः ॥ ४४ ॥ हैयंगवीनमादाय घोषवृद्धानुपागतान् ॥ नाम
धेयानि पृच्छन्तौ वन्यानां मार्गशाखिनां ॥ ४५ ॥ एकादशाधिके ॥ काप्यभिख्या त

© Dharmartha Trust J&K. Digitized by eGangotri

योगात्साधुजितोः अपि लंघितमध्वानं बुबुधे न बुधोपमः ॥४८॥ स दुष्प्रापय
शाः प्रापदाश्रमं श्रान्तवाहनः सायं संयमिनस्तस्य महर्षेर्महिषीसखः ॥४९॥
वनांतरादुपावृत्तैः स्कंधासक्तसमित्कुशैः अग्निप्रत्युद्गमात्पूतैः पूर्यमा
णं तपस्विभिः ४९ ॥ आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः अप
त्यैरिव नीवारभागधेयोचितैर्मृगैः ॥५०॥ सेकान्ते मुनिकन्याभिस्तत्क्षणो
ज्झितवृक्षकं ॥ विश्वासाय विहंगानामालवालाम्बुपायिनां ॥५१॥ आतपात्यय
संक्षिप्तनीवारासु निषादिभिः ॥ मृगैर्वर्तितरोमन्थमुटजाङ्गनभूमिषु ॥५२॥
अभ्युद्यताग्निपिशुनैरतिथीनाश्रमोन्मुखान् ॥ पुनानं पवनोद्धूतैर्धूमैराहु
तिगंधिभिः ॥५३॥ इति कुलकं ॥ अथ यन्तारमादिश्य धुर्यान्विश्रामयेति
सः ॥ तामवरोपयत्पत्नीं रथादवततार च ॥५४॥ तस्मै सभ्याः सभार्याय
गोप्त्रे गुप्ततमेन्द्रियाः ॥ अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥५५॥ विधेः सा
यंतनस्यान्ते स ददर्श तपोनिधिं ॥ अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजं ॥५६॥

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० मु०

१०

नमोजेगृहतुः पादान राजा राज्ञा च मागधी ॥ तौ गुरु गुरुपत्नी च प्रीत्या प्रति
नन्दतुः ॥ ५८ ॥ तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमं ॥ पप्रच्छ कुशलं रा
ज्ये राज्याश्रममुनिं मुनिः ॥ अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः ॥
अर्थ्यामर्थपतिर्वाचमाददे वदतांवरः ॥ ५९ ॥ उपपन्नं ननु शिवं सप्तस्व
ङ्गेषु यस्य मे ॥ दैवीनां मानुषीणां च प्रतिहर्त्ता त्वमापदां ॥ ६० ॥ तव मन्त्र
कृतो मन्त्रैर्दूरात्संशमितारिभिः ॥ प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः श
राः ॥ ६१ ॥ हविरावर्जितं होतः त्वया विधिवदग्निषु ॥ वृष्टिर्भवति शस्याना
मवग्रहविशोषिणां ॥ ६२ ॥ पुरुषायुषजीविन्यो निरातङ्का निरीतयः ॥
यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसं ॥ ६३ ॥ त्वयैवं चिन्त्यमानस्य गुरु
णा ब्रह्मयोनिना ॥ सानुबन्धाः कथं न स्युः संपदो मे निरापदः ॥ ६४ ॥ किं
तु वध्वां तवैतस्यामदृष्टसदृशप्रजं ॥ न मामवति सद्वीपा रत्नसूरपि मे
दिनी ॥ ६५ ॥ नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः ॥ न प्रकाममुजः श्रा

© Dharmartha Trust J&K. Digitized by eGangotri

रूपवेषः क्षितिपसमाजमगात्स्वयंवरस्थम् ॥७६॥ ॥इति श्रीरघुवंशे महाकाव्ये कविश्रीका
लिदासकृतौ स्वयंवराभिगमनो नाम पंचमः सर्गः ॥ ॥श्रीमद्भद्रकाल्यै नमः॥ स तत्र मंचेषु मनोज्ञवेषा
न्सिंहासनस्थानुपचारवत्सु वैमानिकानां मरुतामपश्यदाकृष्टलीलान्नरलोकपालान् १ रतेर्गृहीता
नुनयेन कामं प्रत्यर्पितस्वांगमिवेश्वरेण काकुत्स्थमालोकयतां नृपाणां मनो बभूवेन्दुमतीनिराशं २ वै
दर्भनिर्दिष्टमथो कुमारः कॢप्तेन सोपानपथेन मंचं शिलाविभंगैर्मृगराजशावस्तुंगं नगोत्संगमिवारु
रोह ३ परार्ध्यवर्णास्तरणोपपन्नमासेदिवान्रत्नवदासनं सः भूयिष्ठमासीदुपमेयकान्तिर्मयूरपृ
ष्ठाश्रयिणा गुहेन ४ तासु श्रिया राजपरंपरासु प्रभाविशेषोदयदुर्निरीक्ष्यः सहस्रधात्मा व्यरुचद्विभक्तः
पयोमुचां पंक्तिषु विद्युतेव ५ तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां स मध्ये रराज धाम्ना रघुसूनु
रेव कल्पद्रुमाणामिव पारिजातः ६ नेत्रव्रजाः पौरजनस्य तस्मिन्विहाय सर्वान्नृपतीन्निपेतुः मदोत्कटे रे
चितपुष्पवृक्षा गन्धद्विपे वन्य इव द्विरेफाः ७ अथ स्तुते चंदिभिरन्वयस्य तस्मिन्विहाय सर्वान्नृपतीन्निपे
तुः मनोज्ञकन्यपस्तैः सोमार्कवंश्ये नरदेवलोके संचारिते चागुरुसारयोनौ धूपे समुत्सर्पति वैजयन्ती ८

© Dharmartha Trust J&K. Digitized by eGangotri

पुरोपकंठोपवनाश्रयाणां कलापिनामुद्धतनृत्यहेतौ प्रध्मातशंखे परितो दिगंतांस्तूर्यस्वने मूर्छ
ति मंगलार्थे ९ मनुष्यवाह्यं चतुरस्रयानमध्यास्य कन्यापरिवारशोभि विवेश मंचांतरराजमार्गं पतिंवरा क्लृप्तवि
वाहवेषा १० त्रिभिर्विशेषकं तस्मिन्विधानातिशये विधातुः कन्यामये नेत्रशतैकलक्ष्ये निपेतुरंतःकरणैर्नरें
द्रा देहैः स्थिताः केवलमासनेषु ११ तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः प्रवालशोभा
इव पादपानां शृंगारचेष्टा विविधा बभूः १२ कश्चित्कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफं र
जोभिरंतःपरिवेषबंधि लीलारविंदं भ्रमयां चकार १३ विस्रस्तमंसादपरो विलासी रत्नानुविद्धांगदकोटि
लग्नं प्रावारमुत्क्षिप्य यथाप्रदेशं निनाय साचीकृतचारुवक्त्रः १४ आकुंचिताग्रांगुलिना ततोन्यः कि
चित्समावर्जितनेत्रशोभा तिर्यग्विसंसर्पिनखप्रभेण पादेन हैमं विलिलेख पीठं १५ निवेश्य वामं भु
जमासनार्द्धे तत्संनिवेशादधिकोन्नतांसः कश्चिद्विवृत्तत्रिकभिन्नहारः सुहृत्समाभाषणतत्प
रोभूत् १६ विलासिनीविभ्रमदंतपत्रमापांडुरं केतकपत्रमन्यः प्रियानितंबोचितसंनिवे
शैर्विपाटयामास युवा नखाग्रैः १७ कुशेशयाताम्रतपत्रमापांडुरकेतकपत्रमन्यः प्रियानित

© Dharmartha Trust J&K. Digitized by eGangotri

लेनकश्चित्करेणरेखाध्वजलाञ्छनेन रत्नांगुलीयप्रभयानुविद्धानुदीरयामास सलीलमक्षा
न् १८ कश्चिद्यथाभागमवस्थितेपि स्वसंनिवेशाद्व्यतिलंघिनीव वज्रांशुगर्भांगुलिरंध्रमेकं व्या
पारयामास करं किरीटे १९ ततो नृपाणां श्रुतवृत्तवंशा पुंवत्प्रगल्भा प्रतिहाररक्षी प्राक्संनिकर्षं
मगधेश्वरस्य नीत्वा कुमारीमवदत्सुनंदा २० असौ शरण्यः शरणोन्मुखानामगाधसत्त्वो मगधप्रति
ष्ठः राजा प्रजारंजनलब्धवर्णः परंतपो नाम यथार्थनामा २१ कामं नृपाः संति सहस्रशोन्ये राजन्वतीमाहु
रनेन भूमिं नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चंद्रमसैव रात्रिः २२ क्रियाप्रबंधादयमध्वराणामज
स्रमाहूतसहस्रनेत्रः शच्याश्चिरं पांडुकपोललंबान्मंदारशून्यानलकांश्चकार २३ अनेन चेदि
च्छसि गृह्यमाणं पाणिं वरेण्येन कुरु प्रवेशे प्रासादवातायनसंश्रितानां नेत्रोत्सवं पुष्पपुरांगनाना
२४ तामेव वक्त्रग्रहणानि पु एवं तयोक्ते तमवेक्ष्य किंचिद्विस्रंसिदूर्वांकमधूकमाला ऋजुप्रणा
मक्रिययैव तन्वी प्रत्यादिदेशैनमभाषमाणा २५ जगाद चैनामयमंगनाथः सुरांगनाप्रार्थित
यौवनश्रीः स्थिता सैव वक्त्रग्रहणे नियुक्ता राजान्तरं राजसुतां निनाय समीरणोत्थेव तरंगलेखाय

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० ५१ पातरमातसराजहंसी २६ जगाद चैनामयमंगनाथः सुरांगनाप्रार्थितयौवनश्रीः विनीतनागान्किलसू
त्रकारैरैंद्रपदंभूमिगतोविभुंक्ते २७ अनेनपर्यासयताश्रुबिंदून्मुक्ताफलस्थूलतमांस्तनेषु प्रत्यर्पि
ताः शत्रुविलासिनीनामुन्मुच्यसूत्रेणविनैवहाराः २८ निसर्गभिन्नास्पदमेकसंस्थमस्मिन्द्वयं
श्रीश्चसरस्वतीच कान्त्यागिरासूनृतयाचयोग्यात्वमेवकल्याणितयोस्तृतीया २९ अथांगराजादवता
र्यचक्षुर्यातीतिजन्यानवदत्कुमारी नासौनकाम्योनचवेदसम्यक्द्रष्टुंनसाभिन्नरुचिर्हिलोकः ३०
ततःपरंदुःप्रसहंद्विषाभिर्नृपंनियुक्ताप्रतिहारभूमौ निदर्शयामासविशेषदृश्यमिंदुंनवोत्थानमिवेंदुम
त्यै ३१ अवंतिनाथोयमुदग्रबाहुर्विशालवक्षास्तनुवृत्तमध्य आरोप्यचक्रभ्रममुष्णतेजास्त्व
ष्ट्रेवयत्नोल्लिखितोविभाति ३२ अस्यप्रयाणेषुसमग्रशक्तेरग्रेसरैर्वाजिभिरुत्थितानिरजांसिसामंत
शिखामणीनांप्रभाप्ररोहास्तमयंनयंति ३३ असौमहाकालनिकेतनस्यवसन्नदूरेकिलचंद्रमौलेः राम० १२
तमिस्रपक्षेपिसहप्रियाभिर्ज्योत्स्नावतोनिर्विशतिप्रदोषान् ३४ अनेनेयूनासहपार्थिवेनरंभोरु
कच्चिन्मनसोरुचिस्ते शिप्रातरंगानिलकंपितासुविहर्तुमुद्यानपरंपरासु ३५ तस्मिन्नभिद्योतितब

© Dharmartha Trust J&K. Digitized by eGangotri

धुर्यप्रे प्रत्ययसंशो ऽभिजितशत्रुपक्षो ववंधसानो ऽत्नमसौ कमार्या कुमुद्वती भानुमतो ऽप्रभावं ३६ जाम
ग्रतस्तामरसान्तराभामनूपराजस्य गुणैरनन्ता विधाय सत्संकलिताभिधाना ऽतज्ञोगादन्नपः सुदतीं सुनन्दा ३७
संग्रामनिर्विष्टसहस्रबाहुरष्टादशद्वीपनिखातयूपः अनन्यसाधारणराजशब्दो बभूव योगी किल कार्त्तवी
र्यः ३८ अकार्यचिंतासमकालमेव प्रादुर्भवश्चापधरः पुरस्तात अंतःशरीरेष्वपि यः प्रजानां प्रत्या
दिदेशाविनयं विनेता ३९ ज्याबंधनिस्पंदभुजेन यस्य विनिश्वसद्वक्त्रपरंपरेण काराग्रहे निर्जितवास
वेन लंकेश्वरेणोषितमाप्रसादात ४० तस्यान्वये भूपतिरेष जातः प्रतीप इत्यागमवृद्धसेवी येन श्रियः संश्र
यदोषरूढं स्वभावलोलेत्ययशः प्रमृष्टं ४१ आयोधने कृष्णगतिं सहायमवाप्य यः क्षत्रियकालरात्रिं
धारां शितां रामपरश्वधस्य संभावयत्युत्पलपत्रसारां ४२ अस्यांकलक्ष्मीर्भव दीर्घबाहोर्माहिष्मतीव
प्रनितंबकांची प्रासादजालैर्जलवेणिरम्यां रेवां यदि प्रेक्षितुमस्ति कामः ४३ तस्याः प्रकामं प्रियद
र्शनो ऽपि न स क्षितीशो रुचये बभूव शरत्प्रमृष्टांबुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः ४४ सा
शूरसेनाधिपतिं सुषेणमुद्दिश्य लोकांतरगीतकीर्तिं आचारशुद्धोभयवंशदीपं शुद्धांतरक्ष्या जगदे कुमा

© Dharmartha Trust J&K. Digitized by eGangotri

रघु॰ री ॥ ४५ नीपान्वयः पार्थिव एष यज्वा गुणैर्यमाश्रित्य परस्परेण । सिद्धाश्रमं शान्तमिवैत्य सत्वैर्नैसर्गि
२३ कोऽप्युत्ससृजे विरोधः ॥ ४६ यस्यात्मगेहे नयनाभिरामा कान्तिर्हिमांशोरिव संनिविष्टा । हर्म्याग्रसंरूढतृणां
कुरेषु तेजोऽविषह्यं रिपुमन्दिरेषु ॥ ४७ यस्यावरोधस्तनचन्दनानां प्रक्षालनाद्वारिविहारकाले । कलिन्दक
न्या मथुरां गतापि गङ्गोर्मिसंसक्तजलेव भाति ॥ ४८ त्रस्तेन तार्क्ष्यात्किल कालियेन मणिं विसृष्टं यमुनौ
13 कसा यः । वक्षःस्थलव्यापिरुचं दधानः सकौस्तुभं ह्रेपयतीव विष्णुं ॥ ४९ संभाव्य भर्तारममुं युवानं मृदु
प्रवालोत्तरपुष्पशय्ये । वृन्दावने चैत्ररथादनूने निर्विश्यतां सुन्दरि यौवनश्रीः ॥ ५० अध्यास्य चाम्भः
पृषतोक्षितानि शैलेयगन्धीनि शिलातलानि । कलापिनां प्रावृषि पश्य नृत्यं कान्तासु गोवर्धनकं
दरासु ॥ ५१ नृपं तमावर्तमनोज्ञनाभिः सा व्यत्यगादन्यवधूर्भवित्री । महीधरं मार्गवशादुपेतं स्रोतो
वहा सागरगामिनीव ॥ ५२ अथाङ्गदाश्लिष्टभुजं भुजिष्या हेमाङ्गदं नाम कलिङ्गनाथं । आसेदुषीं सा राम॰
दितशत्रुपक्षं बालामबालेन्दुमुखीं बभाषे ॥ ५३ असौ महेन्द्राद्रिसमानसारः पतिर्महेन्द्रस्य महोदधेश्च । २३
यस्य क्षरत्सैन्यगजच्छलेन यात्रासु यातीव पुरो महेन्द्रः ॥ ५४ ज्याघातरेखे सुभुजो भुजाभ्यां बिभर्ति यश्चाप

© Dharmartha Trust J&K. Digitized by eGangotri

रत्नांपुरोगः श्रियमश्रिवःसांजनवाष्पासेकेवंदीकृतायाश्वपृथ्वीद्वे ५५ यमात्मनःसमानिशांनिविष्टं
मन्द्रध्वनिसाञ्जितयामजर्थः प्रासादस्वानापनस्यपश्चिमेश्ववोधपापर्णावएवसुतं ५६ अनेनसार्द्धं
विहारोऽस्याश्चोरपुतालीवनमन्दिरेषु दीर्घान्तरानीजलवेगपृष्ठैरयाकूनस्वदलवामहर्षिः ५७ प्रलो
भितायथाकृतिलोभनीयाविदर्भराज्ञावरजातएव तस्मादयावर्त्तजहूरकण्ठानिधिवल्लभीः प्रतिकूल
देवान ५८ अथोरगाख्यस्यपुरस्यनाथांदौवारिकीदेवसानमेत्य इत्यश्चकोराक्षिविलोकयेतिपूर्वा
नुशिष्टांनिजगादभोज्या ५९ यांप्रेक्ष्यमंसार्पितजंविहार॰लास्यागरागोहरिचंदनेनः आभातिबाला
तपरक्तसानुःसानिर्झरोहणाद्रिराजः ६० विद्यास्थानसंस्तम्भपितामहोर्नैःश्रेयसातोक्षितसिद्धनाथ
प्रीताश्रमेचावभृथार्द्रमज्जैः सौस्नातिकोयस्यभवाब्धगस्यः ६१ अस्मिन्हराह्वामवताऽदरायपेनेदृशो
काचनयापद्मपुरोजनस्यानविमर्दहर्षाकीसंधायलेकाधिपतिः प्रतस्थे ६२ अनेनयाशोविधिव
म्पहीतेमहाकुलानानेनमहीवज्रवी रत्नानुविद्यार्णवमेखलायादिशः सपत्नीभवदस्तिरास्यां ६३ ताद्द
वह्नीयरिराहूरुरागास्विलालतालिंगितचंदनास तमालपत्रास्तरणासुरतं प्रसीदशाश्वन्मलयस्थलीषु ६४

© Dharmartha Trust J&K. Digitized by eGangotri

इंदीवरश्यामतनुर्नृपोसौ त्वं रोचनागौरशरीरयष्टिः अन्योन्यशोभापरिवृद्धये वां योगस्तडित्तोयदयो
रिवास्तु ६५ स्वसुर्विदर्भाधिपतेस्तदीयो लेभेन्तरं चेतसि नोपदेशः दिवाकरादर्शनबद्धकोशे नक्षत्र
नाथांशुरिवा~~स्तु ६६ स्व~~रविंदे ६६ संचारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा नरेन्द्रमार्गा
ट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ६७ तस्यां रघोः सूनुरुपस्थितायां वृणीत मां नेति समाकुलो
भूत् वामेतरः संशयमस्य बाहुः केयूरबंधोच्छ्वसितैर्नुनोद ६८ तं प्राप्य सर्वावयवानवद्यं व्यावर्तता
न्योपगमात्कुमारी न हि प्रफुल्लं सहकारमेत्य वृक्षांतरं कांक्षति षट्पदाली ६९ तस्मिन्समावेशित
चित्तवृत्तिमिंदुप्रभामिंदुमतीमवेक्ष्य प्रचक्रमे वक्तुमनुक्रमज्ञा सविस्तरं वाक्यमिदं सुनंदा ७० इक्ष्वाकुवं
श्यः ककुदं नृपाणां ककुत्स्थ इत्याहितलक्षणोभूत् काकुत्स्थशब्दं यत उन्नतेच्छाः श्लाघ्यं दधत्युत्तरकोश
लेन्द्राः ७१ महेन्द्रमास्थाय महोक्षरूपं यः संयति प्राप्तपिनाकिलीलः चकार बाणैरसुरांगनानां गंडस्थलीः
प्रोषितपत्रलेखाः ७२ ऐरावतास्फालनविश्लथं यः संघट्टयन्नंगदमंगदेन उपेयुषः स्वामपि मूर्तिमग्र्या
मर्धासनं गोत्रभिदोधितष्ठौ ७३ जातः कुले तस्य किलोरुकीर्तिः कुलप्रदीपो नृपतिर्दिलीपः अति

© Dharmartha Trust J&K. Digitized by eGangotri

षद्देकोनशतक्रतुत्वेशक्राभ्यसूयाविनिवृत्तयेयः ७४ तस्मिन्महीं शासति वारिणोनानां निद्रां विहारार्ध
पथेगतानां वातोपिनास्रंसयदंशुकानि कोलंबयेदाभरणाय हर्तुं ७५ पुत्रो रघुस्तस्य पदं प्रशास्ति म
हाक्रतोर्विश्वजितः प्रयोक्ता चतुर्दिगावर्जितसंभृतां यो मृत्पात्रशेषामकरोद्विभूतिं ७६ आरूढमद्री
नुदधीन्प्रतीर्णां भुजंगमानां वसतिं प्रविष्टं ऊर्ध्वं गतं यस्य न चानुबंधि यशः परिच्छेत्तुमियत्तयालं ७७
असौ कुमारस्तमजोनुजातस्त्रिविष्टपस्येव पतिं जयंतः गुर्वीं धुरं यो भुवनस्य पित्रा धुर्येण दम्यः सदृशो
बिभर्ति ७८ कुलेन कान्त्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं
समागच्छतु काञ्चनेन ७९ ततः सुनंदावचनावसाने लज्जां तनूकृत्य नरेन्द्रकन्या दृष्ट्या प्रसादामलया कु
मारं प्रत्यग्रहीत्संवरणस्रजेव ८० सा यूनि तस्मिन्नभिलाषबंधं शशाक शालीनतया न वक्तुं रोमांचलक्ष्ये
ण स गात्रयष्टिं भित्वा निराक्रामदरालकेश्याः ८१ तथागतायां परिहासपूर्वं सख्यां सखी वेत्रधरा बभाषे आ
र्ये व्रजामोन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श ८२ सा चूर्णगौरं रघुनंदनस्य धात्रीकराभ्यां करभोपमो
रुः आसंजयामास यथाप्रदेशं मेवानुरागं ८३ तया स्रजा मंगलपुष्पमय्या विशालवक्षःस्थललंबया सः

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० अमंसकेऽर्पितवाहुपाशांविदर्भराजावरजांवरेणयः ८४ शशिनमुपगतेयंकौमुदीमेघमुक्तंजलनि
१५ धिमनुरूपंजन्हुकन्यावतीर्णा इतिसमगुणयोगप्रीतयस्तत्रपौराः श्रवणकटुनृपाणामेकवाक्यंविवव्रुः
८५ प्रमुदितवरपक्षमेकतस्तत्क्षितिपतिमंडलमन्यतोवितान उषसिसरइवप्रफुल्लपद्मंकुमुदवनप्रति
15 पन्ननिद्रमासीत॥८६॥ ॥इतिश्रीरघुवंशेमहाकाव्येकविश्रीकालिदासकृतौस्वयंवरवर्णनोना
मषष्ठसर्गः॥ ॥श्रीभद्रकाल्यैनमः अथोपयंत्रासदृशेनयुक्तांस्कंदेनसाक्षादिवदेवसेना स्वसा
रमादायविदर्भनाथः पुरप्रवेशाभिमुखोवभूव १ सेनानिवेशान्पृथिवीक्षितोपिजग्मुर्विभातग्रहमंदभा
सः भोज्यांप्रतिव्यर्थमनोरथत्वाद्रूपेषुवेषेषुचसाभ्यसूयाः २ सान्निध्ययोगात्किलतत्रशच्याः स्वयंव
रक्षोभकृतामभावः काकुत्स्थमुद्दिश्यसमत्सरोपिशशामतेनक्षितिपाललोकः ३ तावत्प्रकीर्णाभिनवोपचा
रमिंद्रायुधद्योतिततोरणांकं वरःसवध्वासहराजमार्गंप्रापध्वजच्छायनिवारितोष्णं ४ ततस्तदालोकनतत्प
राणांसौधेषुचामीकरजालवत्सु वभूवुरित्थंपुरसुंदरीणांत्यक्तान्यकार्याणिविचेष्टितानि ५ आलोकमा राम०
र्गंसहसाव्रजंत्याकयाचिदुद्वेष्टनवांतमाल्यः वद्धुंनसंभावितएवतावत्करेणरुद्धोपिचकेशपाशः ६ प्रसा १५

© Dharmartha Trust J&K. Digitized by eGangotri